॥ रासगीता ॥

.. rAsagItA ..

sanskritdocuments.org

July 26, 2016

Document Information

Text title : rAsagItA
File name : rAsagItA.itx
Category : gItA
Location : doc_giitaa
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : PSA Easwaran psaeaswaran at gmail.com
Proofread by : PSA Easwaran psaeaswaran at gmail.com
Latest update : May 18, 2013
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

॥ रासगीता ॥

नारद उवाच –
श्रीराधा माधवस्यापि राधायाश्चापि माधवः ।
करोति परमानन्दं प्रेमालिङ्गनपूर्वकम् ॥ १॥

राधासुखसुधासिन्धुः कृष्णश्चुम्बति राधिकाम् ।
श्यामप्रेममयी राधा सदा चुम्बति माधवम् ॥ २॥

त्रिभङ्गललितः कृष्णो मुरलीं पूरयेन्मुदा ।
चालयेद्रेणुरन्ध्रेषु राधिका च कराङ्गुलीः ॥ ३॥

श्रीनामाकर्षणं कृष्णं राधा गायति सुन्दरम् ।
शब्दब्रह्मध्वनिं राधां कृष्णो धारयति ध्रुवम् ॥ ४॥

मुरलीकलसङ्गीतं श्रुत्वा मुग्धा व्रजस्त्रियः ।
कदम्बमूलमायाता यत्रास्ति मुरलीधरः ॥ ५॥

राधाकान्तो व्रजस्त्रीभिर्वेष्टितो व्रजमोहनः ।
शोभते तारकामध्ये तारकानायको यथा ॥ ६॥

किशोरी सुन्दरी राधा किशोरः श्यामसुन्दरः ।
किशोर्यो व्रजसुन्दर्यो विहरन्ति निरन्तरम् ॥ ७॥

नित्यवृन्दावने राध्या राधाकृष्णश्च गोपिकाः ।
मण्डलं पूर्णरासस्य लीलया संवितथ्यते ॥ ८॥

राधया सह कृष्णेन क्रियते रासमण्डलम् ।
कल्पितानेकरूपेण मायया परमात्मना ॥ ९॥

माधवराधयोर्मध्ये राधामाधवयोरपि ।
माधवो राधया सार्द्धं राजते रासमण्डले ॥ १०॥

गोपालवल्लभा गोप्यो राधिकायाः कलात्मिकाः ।
क्रीडन्ति सह कृष्णेन रासमण्डलमण्डिताः ॥ ११॥

कृत्वा चानेकरूपाणि गोपीमण्डलसंश्रयः ।
गोविन्दो रमते तत्र तासां मध्ये द्वयोर्द्वयोः ॥ १२॥

प्रेमस्पर्शमणिं कृष्णं श्लिष्यन्तो व्रजयोषितः ।
भवन्ति सर्वकालाढ्या गोविन्दहृदयङ्गमाः ॥ १३॥

एकैकगोपिकापार्श्वे हरेरेकैकविग्रहः ।
सुवर्णगुटिकायोगे मध्ये मारकतो यथा ॥ १४॥

हेमकल्पलतागोपीबाहुभिः कण्ठमालया ।
तमालश्यामलः कृष्णो घूर्ण्यते रासलीलया ॥ १५॥

किङ्किणीनूपुरादीनां भूषणानां च भूषणम् ।
कैशोरं सफलं कुर्वन् गोपीभिः सह मोदते ॥ १६॥

राधाकृष्णेति सङ्गीतं गोप्यो गायन्ति सुस्वरम् ।
राधाकृष्णरीनात्तहस्तकानुपदक्रमैः ॥ १७॥

जय कृष्ण मनोहर योगधरे यदुनन्दन नन्दकिशोर हरे ।
जय रासरसेश्वरि पूर्णतमे वरदे वृषभानुकिशोरि यमे ॥ १८॥

जयतीह कदम्बतले मिलितः कलवेणुसमीरितगानरतः ।
सह राधिकया हरिरेकमहः सततं तरुणीगणमध्यगतः ॥ १९॥

वृषभानुसुता परमा प्रकृतिः पुरुषो व्रजराजसुतप्रकृतिः ।
मुहुर्नृत्यति गायति वादयते सह गोपिकया विपिने रमते ॥ २०॥

यमुनापुलिने वृषभानुसुता नवका-ललितादि सखीसहिता ।
रमते विधुना सह नृत्यवता गतिचञ्चलकुण्डलहारवता ॥ २१॥

स्फुटपद्ममुखी वृषभानुसुता नवनीतसुकोमलबाहुयुता ।
परिरभ्य हरिं प्रियमात्मसुखं परिचुम्बति शारदचन्द्रमुखम् ॥ २२॥

रसिको व्रजराजसुतः सुरते रसिकां वृषभानुसुतां भजते ।
नवपल्लवकल्पिततल्पगतां सुकुमारमनोभवभाववशाम् ॥ २३॥

वसुदेवसुतोरसि हेमलता स्फुटपीनपयोधरभारवता ।
शयनं कुरुते वृषभानुसुता प्रणमामि सदा वृषभानुसुताम् ।
नवनीरदसुन्दरनीलतनुं तडिदुज्ज्वलकुण्डलिनीं सुतनुम् ॥ २५॥

शिथिकण्ठशिखण्डलसन्मुकुटं कबरीपरिबद्धकिरीटघटाम्(?) ।
कमलाश्रितखञ्जननेत्रयुगं मकराकृतिकुण्डलगण्डयुगम् ॥ २६॥

परिपूर्णमृगाङ्कसुचारुमुखं मणिकुण्डलमण्डितगण्डयुगम् ।
कनकाङ्गदशोभितबाहुधरं मणिकङ्कणशोभितशङ्खकराम् ॥ २७॥

मणिकौस्तुभभूषितहारयुतं कुचकुम्भविराजितहारलताम् ।
तुलसीदलदामसुगन्धितनुं हरिचन्दनचर्चितगौरतनुम् ॥ २८॥

तनुभूषितपीतपटीजडितं रशनान्वितनीलनिचोलयुताम् ।
तरसाञ्जनदिग्गजराजगतिं कलनूपुरहंसविलासगतिम् ॥ २९॥

रतिनाथमनोहरवेशधरं निजनाथमनोहरवेशधराम् ।

मणिनिर्मितपङ्कजमध्यगतं रसरासमनोहरमध्यरताम् ॥ ३०॥

मुरलीमधुरश्रुतिरागपरं स्वरसप्तसमन्वितगानपराम् ।
नवनायकवेशकिशोरवयो व्रजराजसुतः सह राधिकया ॥ ३१॥

इतरेतरबद्धकरभ्रमणं कुरुते कुसुमायुधकेलिवनम् ।
अधिकेहितमाधवराधिकयोः वृतरासपरस्परमण्डलयोः॥ ३२॥

मणिकङ्कणशिञ्चिततालवनं हरते सनकादिमुनेर्मननम् ।
वृषभानुसुता व्रजराजसुतः कनकप्रतिमा मणिमारकतः ॥ ३३॥

भ्रमतीह यथाविधि यन्त्रगतः सहयोगगतो यमितान्तरितः ।
उभयोरुभयोराधयोर्दयिते पृथगन्तरिते वृषभानुसुते ॥ ३४॥

वृषभानुसुताभुजबद्धगलः कुशली व्रजराजसुतः सकलः ।
यदुनन्दनयोर्भुजबद्धगला वृषभानुसुता रुचिरा सकला ॥ ३५॥

वृषभानुसुता व्रजराजसुतः व्रजराजसुतो वृषभानुसुता ।
केलिकदम्बतले वनमाली नृत्यति चञ्चलचन्द्रकमौली ॥ ३६॥

राधिकया सह रासविलासी गोपवधूप्रियगोकुलवासी ।
क्रीडति राधिकया सह कृष्णः श्रीमुखचन्द्रसुधारसतृष्णः ॥ ३७॥

नर्तकखञ्जनलोचनलोलः कुण्डलमण्डितचारुकपोलः ।
कुञ्जगृहे कुसुमोत्तमतल्पे सूर्यसुताजलवायुसुकल्पे ॥ ३८॥

केशव आदिरसं प्रतिशेते राधिकया सह चन्द्रसुशीते ।
रासरसे सुविराजितराधा चन्दनचर्चितपङ्कजगन्धा ॥ ३९॥

माधवसङ्गमवर्धितरङ्गा पूर्णमनोरथमन्मथसङ्गा ।
शोभनकोमलदिव्यशरीरा कृष्णवपुःपरिमाणकिशोरा ॥ ४०॥

भावमयी वृषभानुकिशोरी काञ्चनचम्पककुङ्कुमगौरी ।
राधयोराधयोर्मध्यतो मध्यतो माधवो माधवो मण्डले शोभते ॥ ४१॥

राधिका राधिका माधवं चुम्बति माधवो माधवो राधिकां श्लिष्यति ।
राधिका राधिका माधवं गायति माधतो राधिकां वेणुना गायति ॥ ४२॥

कल्पिते मण्डले राजते राधिका माधवप्रेमसन्दोहसंराधिका ।
राधिकां राधिकां चान्तरेणान्तरः माधवं माधवं चान्तरेणान्तरा ।
माधवो माधवो राधिका राधिका राधिका राधिका माधवो माधवः ॥ ४३॥

वासावतारविस्तारं वंशीवादनसुन्दरम् ।
रतिकाममदाक्रान्तं राधाकृष्णं भजाम्यहम् ॥ ४४॥

भ्रमन्तं रासचक्रेण नृत्यन्तं तालशिञ्जितैः ।
गोपीभिः सह गायन्तं राधाकृष्णं भजाम्यहम् ॥ ४५॥

रासमण्डलमध्यस्थं प्रफुल्लवदनाम्बुजम् ।
अनन्यहृदयासक्तं राधाकृष्णं भजाम्यहम् ॥ ४६॥

विद्युद्गौरं घनश्यामं प्रेमालिङ्गनतत्परम् ।
परस्परकमर्द्धाङ्गं राधाकृष्णं भजाम्यहम् ॥ ४७॥

राधिकारूपिणं कृष्णं राधिकां कृष्णरूपिणीम् ।
रासयोगानुसारेण राधाकृष्णं भजाम्यहम् ॥ ४८॥

पुष्पिते माधवीकुञ्जे पुष्पतल्पोपरिस्थितम् ।
विपरीतरतासक्तं राधाकृष्णं भजाम्यहम् ॥ ४९॥

रासक्रिडापरिश्रान्तं मधुपानपरायणम् ।
ताम्बूलपूर्णवक्त्रेन्दुं राधाकृष्णं भजाम्यहम् ॥ ५०॥

रासोल्लासकलापूर्णं गोपीमण्डलमण्डितम् ।
श्रीमाधवं राधिकाख्यं पूर्णचन्द्रमुपास्महे ॥ ५१॥

चतुर्वर्गफलं त्यक्त्वा श्रीवृन्दावनमध्यतः ।
श्रीराधा-श्रीपादपद्मं प्रार्थये जन्मजन्मनि ॥ ५२॥

राधाकृष्णसुधासिन्धुरासगङ्गाङ्गसङ्गमे ।
अवगाह्य मनोहंसो विहरेच्च याथासुखम् ॥ ५३॥

रासगीतां पठेद्यस्तु श‍ृणुयद्वापि यो नरः ।
वाञ्छासिद्धिर्भवेत्तस्य भक्तिः स्यात् प्रेमलक्षणा ॥ ५४॥

लक्ष्मीस्तस्य वसेद्गेहे मुखे भाति सरस्वती ।
धर्मार्थकामकैवल्यं लभते सत्यमेव सः ॥ ५५॥

समाप्तेयं रासगीता ।

Encoded and proofread by PSA Easwaran psaeaswaran at gmail.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

.. rAsagItA ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*